प्रभा, स्त्री, (प्रकर्षेण भातीति। प्र+भा+"आतश्चोपसर्गे।" ३।३।१०६। इति अङ्।) कुवेरपुरी। इति हेमचन्द्रः। २।१०४॥ (प्र+भा+भावे अङ्।) दीप्तिः। तत्पर्य्यायः। रोचिः २ द्युतिः ३ शोचिः ४ त्विषा ५ ओजः ६ भाः ७ रुचिः ८ विभा ९ आलोकः १० प्रकाशः ११ तेजः १२ रुक् १३। इति राजनिर्घण्टः॥ * ॥ (यथा, रामायणे। २।३६।१८।
"यराजयत वैदेही वेश्म तत् सुविभूषिता।
उद्यतोऽंशुमतः काले खं प्रभेव विवस्वतः॥"
तथा च महाभारते। ४।१३।१७।
"रतीव रूपिणी किन्त्वमनङ्गाङ्गविहारिणी।
अतीव भ्राजसे सुभ्रु! प्रभेवेन्दोरनुत्तमा॥")
गोपीविशेषः। यथा,—
"इत्थं प्रभया गोप्या युक्तो वृन्दावने वने।
सद्योमत्शब्दमात्रेण तिरोधानं कृतं त्वया॥
प्रभा देहं परित्यज्य जगाम सूर्य्यमण्डलम्।
ततस्तस्याः शरीरञ्च तीव्रं तेजो बभूव ह॥
संविभज्य त्वया दत्तं प्रेमृणाश्रु रुदता पुरा।
विन्यस्य चक्षुषोर्लोहं लज्जया मद्भयेन च॥
हुताशनाय किञ्चिच्च नृपेभ्यश्चापि किञ्चन।
किञ्चित् पुरुषसिंहेभ्यो देवेभ्यश्चापि किञ्चन॥
किञ्चिद्दस्युजनेभ्यश्च नागेभ्यश्चापि किञ्चन।
ब्राह्मणेभ्यो मुनिभ्यश्च तपस्विभ्यश्च किञ्चन॥
स्त्रीभ्यः सौभाग्ययुक्ताभ्यो यशस्विभ्यश्च किञ्चन।
तच्च दत्त्वा तु सर्व्वेभ्यः पूर्व्वं रोदितुमुद्यतः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे। ११। ५७—६२॥
दुर्गा। यथा,—
"यमस्य भगिनी जाता यमुना तेन सा मता।
प्रभा प्रसादशीलत्वात् ज्योत्स्ना चन्द्रार्कमालिनी॥"
इति देवीपुराणे ४५ अध्यायः॥ * ॥
(इयं हि सूर्य्यबिम्बे एतनाम्ना कीर्त्त्यते। यथा, देवीभागवते। ७।३०।८२।
"देवलोके तथेन्द्राणी ब्रह्मास्येषु सरस्वती।
सूर्य्यबिम्बे प्रभा नाम मातॄणां वैष्णवी मता॥")
सूर्य्यपत्नी। यथा,—
सूत उवाच।
"विवस्वान् काश्यपात् पूर्व्वमदित्यामभवत् पुरा।
तस्य पत्नीत्रयन्तद्वत् संज्ञा राज्ञी प्रभा तथा॥
रैवतस्य सुता राज्ञी रेवन्तं सुषुवे सुतम्।
प्रभा प्रभावं सुषुवे त्वाष्ट्री संज्ञा तथा मनुम्॥"
इति मात्स्ये। ११। २—३॥
(द्वादशाक्षरवृत्तिविशेषः। तल्लक्षणं यथा, वृत्तरत्नाकरटीकायाम्।
"वसुयुगविरतिर्नौ रौ प्रभा॥")
प्रभाकरः, पुं, (प्रभां करोतीति। कृ+"दिवाविभानिशाप्रभेति।" ३।२।२१। इति टः।) सूर्य्यः। (यथा, रघौ। १०। ७४।
"कृशानुरपधूमत्वात् प्रसन्नत्वात् प्रभाकरः।
रक्षोविप्रकृतावास्तामपविद्धशुचाविव॥")
अग्निः। चन्द्रः। (यथा, महाभारते। ७।९९।५।
"तावतीत्य रथानीकं विमुक्तौ पुरुषर्षभौ।
दृश्याते यथा राहोरास्यान्मुक्तौ प्रभाकरौ॥"
"प्रभाकरौ चन्द्रसूर्य्यौ॥") समुद्रः। इति शब्दरत्नावली॥ अर्कवृक्षः। इत्यमरः। ११३१२८॥ (अष्टममन्वन्तरे देवगणभेदः। यथा, मार्कण्डेयपुराणे। ८०। ६।
"तपस्तप्तश्च शक्रश्च द्युतिर्ज्योतिः प्रभाकरः॥"
अत्रिवंशीयमुनिविशेषः। यथा, हरिवंशे। ३१। १०।
"ऋषिर्जातोऽत्रिवंशे तु तासां भर्त्ता प्रभाकरः।
भद्रायां जनयामास सुतसोमं यशस्विनम्॥"
नागभेदः। यथा, महाभारते। १। ३५। १५।
"कुठरः कुञ्जरश्चैव तथा नागः प्रभाकरः॥"
मीमांसकप्रभेदः। स च गुरुत्वेन प्रसिद्धः। तस्य मतं दर्शनशास्त्रादौ प्राभाकरमतमिति प्रसिद्धम्। यदुक्तं वेदान्तसारे।५३। "प्राभाकरतार्किकौ तु 'अन्योऽन्तरात्मा आनन्दमय' इत्यादिश्रुतेः सुषुप्तौ बुद्ध्यादीनामज्ञाने लयदर्शनात् अहमज्ञोऽहं ज्ञानीत्याद्यनुभवाच्च अज्ञानमात्मेति वदतः॥" क्ली, कुशद्वीपस्थवर्षभेदः। यथा, मात्स्ये। १२१। ६८।
"महिषं महिषस्यापि पुनश्चापि प्रभाकरम्॥")
प्रभाकीटः, पुं, (प्रभान्वितः कीट इति मध्यलोपी समासः।) खद्योतः। इति राजनिर्घण्टः॥
प्रभाञ्जनः, पुं, शोभाञ्जनः। इति हेमचन्द्रः॥
प्रभातं, क्ली, (प्रकर्षेण भातुं प्रवृत्तमिति। प्र+भा+आदिकर्म्मणि क्तः। यद्वा, प्रकृष्टं भातं दीप्तिरत्रेति।) प्रातःकालः। तत्पर्य्यायः। प्रत्यूषः २ अहर्मुखम् ३ कल्यम् ४ उषः ५ प्रत्युषः ६। इत्यमरः। १। ४। ३॥ दिनादिः ७ निशान्तम् ८ व्युष्टम् ९ प्रगे १० प्राह्णम् ११। इति राजनिर्घण्टः॥ गोसः १२ गोसर्गः १३ ऊषः १४ ऊषकम् १५ उषा १६ ऊषा १७ विभातम् १८। इति शब्दरत्नावली॥ * ॥ (यथा,—
"प्रभाते यः स्मरेन्नित्यं दुर्गा दुर्गाक्षरद्वयम्।
आपदस्तस्य नश्यन्ति तमः सूर्य्योदये यथा॥"
इति धर्म्मशास्त्रम्॥)
तत्र दर्शनीया यथा,—
"वैद्यः पुरोहितो मन्त्री दैवज्ञोऽथ चतुर्थकः।
प्रभातकाले द्रष्टव्यो नित्यं स्वश्रियमिच्छता॥"
इति राजवल्लभः॥
प्रभावः, पुं, (प्र+भू+घञ्।) कोषदण्डजतेजः। तत्पर्य्यायः। प्रतापः २। इत्यमरः। २।८।२०॥
"कोषो धनं दण्डो दमः तद्धेतुत्वात् सैन्यमपि दण्डः ताभ्यां यत्तेजो जायते स प्रतापः प्रभावश्च कथ्यते।" इति भरतः॥ शक्तिः। (यथा,—
"प्रभावतो यथा धात्री लकुचस्य रसादिभिः।
समापि कुरुते दोषत्रितयस्य विनाशनम्॥
क्वचित्तु केवलं द्रव्यं कर्म्म कुर्य्यात् प्रभावतः।
ज्वरं हन्ति शिरोबद्धा सहदेवी जटा यथा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
तेजः। इति हेमचन्द्रः। ३। ४०४॥ (यथा, रामायणे। २। २३। ३८।
"अद्य मेऽस्त्रप्रभावस्य प्रभावः प्रभविष्यति।
राज्ञश्चाप्रभुतां कर्त्तुं प्रभुत्वञ्च तव प्रभो!॥")
शान्तिः। इति मेदिनी। वे, ४०॥ (प्रभागर्भजातः सूर्य्यपुत्रः। इति मात्स्ये। ११। ३॥ कलावत्यां जातः स्वरोचिषो मनोः पुत्रविशेषः। यथा, मार्कण्डेये। ६६। ५।
"ततश्च जज्ञिरे तस्य त्रयः पुत्त्राः स्वरोचिषः।
विजयो मेरुनन्दश्च प्रभावश्च महाबलः॥")
प्रभावजः, पुं, (प्रभावात् जायते इति। जन्+डः।) शक्तिविशेषः। प्रभावो वीर्य्याधिक्यं तज्जातः। इत्यमरटीकासारसुन्दरी॥ प्रभुत्वसाधकत्वात् दण्डकोषौ प्रभुशक्तिः। इति भरतः॥ (प्रभावजाते, त्रि। यथा,—
"रसादिसाम्ये यत् कर्म्म विशिष्टं तत् प्रभावजम्।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
प्रभावान्, [त्] त्रि, (प्रभा अस्त्यस्येति। प्रभा+मतुप् मस्य वः।) प्रभायुक्तः। प्रभाशब्दादस्त्यर्थे वतुप्रत्ययेन निष्पन्नम्॥
प्रभावती, स्त्री, (प्रभावत्+ङीप्।) मालिनामकोनविंशवृत्ताहंभ्याता। गणानां वीणा। इति हेमचन्द्रः। २। २०३॥ त्रयोदशाक्षरच्छन्दः। यथा, श्रुतबोधे। ३। २।
"यस्यां प्रिये! प्रथमकमक्षरद्वयं
तुर्य्यन्तथा गुरु नवमं दशान्तिमम्।
सान्त्यं भवेद्यतिरपि चेद्युगग्रहैः
सालक्ष्यतामन्दतरुते! प्रभावती॥"
(सूर्य्यपत्नी। यथा, महाभारते। ५। ११७।८।
"रेमे स तस्यां राजर्षिः प्रभावत्यां यथा रविः॥"
कुमारानुचरमातृगणविशेषः। यथा, तत्रैव। ९। ४६। ३।
"प्रभावती विशालाक्षी पलिता गोनसी तथा॥"
वज्रनाभासुरस्य कन्या। सा तु प्रद्युम्नेन विवाहिता। यथा, हरिवंशे। १४८। ४१।
"तस्यास्ति कन्यारत्नं हि त्रैलोक्यातिशयं शुभम्।
नाम्ना प्रभावती नाम चन्द्राभेव प्रभावती॥"
अङ्गेश्वरचित्ररथस्य स्वनामख्याता भार्य्या। यथा, महाभारते। १३। ४२। ८।
"तस्या हि भगिनी तात! ज्येष्ठा नाम्ना प्रभावती।
भार्य्या चित्ररथस्यास्य बभूवाङ्गेश्वरस्य च॥")
प्रभाषः, पुं, (प्रभाषते यः सः। प्र+भाष्+अच्।) वसुभेदः। इति जटाधरः॥ (यथा, महाभारते। १। ६६। १८।
"प्रत्यूषश्च प्रभाषश्च वसवोऽष्टाविति स्मृताः॥"
प्र+भाष्+भावे घञ्।) प्रकृष्टकथनञ्च॥
प्रभासः, पुं, (प्रभासते शोभते इति। प्र+भास्+अच्।) सोमतीर्थम्। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ३। ८२। ५६—५७।
"ततो गच्छेत राजेन्द्र! प्रभासं तीर्थमुत्तमम्।
तत्र सन्निहितो नित्यं स्वयमेव हुताशनः।
देवतानां मुखं वीर! ज्वलनोऽनिलसारथिः॥